
## 10


# समयः

**छात्राः एतानि उदाहरणानि पश्यन्तु—**


- अधुना दशवादनं संवृत्तम्।
- सार्धदशवादने अहं बहिः गच्छामि
- इदानीं रात्रेः नववादनम्।
- पादोनदशवादने शय्यां गच्छामि।
- माता— पुत्र! षड्वादनं जातम्!
- पुत्र— आम् मातः। उत्तिष्ठामि। मया तु सार्धसप्तवादने विद्यालयं प्रति गन्तव्यम् अस्ति।
- सम्प्रति अष्टवादनं जातम्।
- एकादशवादने मित्रम् आगच्छति।




द्वादशवादनम्



दशवादनम्




सपादसप्तवादनम्



पादोनपञ्चवादनम्

© NCERT not to be republished




सार्धनववादनम्

## अभ्यास:

**1. अधोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत–**

**उदाहरणम् —**

द्वितलीयरेलवाहनं .................................. (10:15) वादने जयपुरं प्राप्नोति।

द्वितलीयरेलवाहनं सपाददशवादने जयपुरं प्राप्नोति।

(i) पुरुषोत्तम-एक्सप्रेस इति रेलयानं .................................. (9:30) वादने पुरीत: प्रस्थानं करोति।

(ii) चेतक-एक्सप्रेस इति रेलयानं .................................. (4:45) वादने दिल्लीम् आगच्छति।

(iii) हावड़ा-एक्सप्रेस .................................. (11:00) वादने हावड़ास्थानकं प्राप्नोति।

(iv) रेलयानमेकं .................................. (8:15) उत्तराञ्चलं प्रति गच्छति।

**2. अधोलिखितवाक्येषु उदाहरणानुसारं समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत–**

**उदाहरणम् —**

माता प्रात: ..................................(5:00) वादने उत्तिष्ठति।


माता प्रात: पञ्चवादने उत्तिष्ठति।

(i) राहुल: प्रातर्भ्रमणाय .................................. (6:15) वादने उद्यानं गच्छति।

(ii) मल्लिका .................................. (7:30) वादने प्रातराशं करोति।

(iii) अनन्या .................................. (5:45) वादने क्रीडति।

(iv) सर्वे .................................. (10:00) वादने शयनं कुर्वन्ति।।





© NCERT not to be republished



Workbook.indd 82 5/24/2019 3:50:06 PM

समयः

3. **अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत—**
**उदाहरणम्—**

प्रातः .................................. (7:00) वादनतः .................................. (7:45) वादनपर्यन्तं विद्यालये प्रार्थनासभा भवति।

प्रातः सप्तवादनतः पादोनाष्टवादनपर्यन्तं विद्यालये प्रार्थनासभा भवति।

(i) .................................. (8:15) वादनतः .................................. (9:00) वादनपर्यन्तं विज्ञानविषयस्य कालांशः भवति।

(ii) वयं .................................. (9:00) वादनतः .................................. (9:45) वादनपर्यन्तं गणितविषयं पठामः।

(iii) .................................. (2:45) वादनतः .................................. (3:30) वादनपर्यन्तं हिन्दीभाषाकालांशः भवति॥

(iv) संस्कृतशिक्षकः .................................. (10:15) वादने अध्यापयति।

4. **अधोलिखितवाक्येषु समयबोधकेषु पदेषु रिक्तस्थानानि पूरयत—**
**उदाहरणम्—**

छात्रः ..................................(5:00) वादने उत्तिष्ठति ..................................(6:15) वादने व्यायामं करोति।

छात्रः पञ्चवादने उत्तिष्ठति सपादषड्वादने व्यायामं करोति।

(i) छात्रः.................................. (7:30) वादने प्रातराशं कृत्वा ..................................(9:45) वादने विद्यालयं गच्छति।

(ii) .................................. (4:00) वादने गृहमागत्य .................................. (4:30) वादनपर्यन्तं विश्रामं करोति।

(iii) .................................. (5:00) वादने भोजनं कृत्वा .................................. (9:30) वादनपर्यन्तम् अध्ययनं करोति।

(iv) रात्रौ .................................. (9:45) वादनतः .................................. (5:00) वादनपर्यन्तं शयनं करोति।



© NCERT not to be republished



Workbook.indd 83 5/24/2019 3:50:06 PM